॥ दाशरथ्यष्टकम् ॥

क्षीरसागरवारिमध्यमहाहिभोगनिवासिनं
नारदादिमुनींद्रवंदितचारुपादसरोरुहम् ।
वारिजामलपत्रलोचनमब्जजारमणं विभुं
नारसिंहतनुं हरिं प्रणमामि दशरथिं सदा ॥ १ ॥

पाकशासनवंदितामलपादयुग्मसरोरुहं
शोकनाशनमीशमीशमशेषदोषविवर्जितम् ।
लोकसंभवसंह्यतिस्थितिहेतुभूतगुणोदयं
नाकवासजनप्रियं प्रणमामि दशरथिं सदा ॥ २ ॥

अंडजाधिपवाहनं शशिमंडलाभिमुखं
महादंडकावनसेवितं वरकुंडलांगदभूषणम् ।
चंडविक्रमखंडितासुरमंडलं मधुसूधनं
पांडवप्रियसारथिं प्रणमामि दशरथिं सदा ॥ ३ ॥

तर्कनिश्चितचित्तवृत्तिभिरप्रतर्क्यगुणोदयं
शक्रगर्वविदारणं धृतचक्रमक्रमवर्जितम् ।
अर्कमंडलमध्यवर्तिनमक्षयं पुरुषोत्तमं
शुक्रनेत्रहरं हरिं प्रणमामि दशरथिं सदा ॥ ४ ॥

बाल कालमशेषदानवशासनं प्रणवात्मकं
स्थूलसूक्ष्मतनुं विभुं गुणकारणात्मगुणोदयम् ।
लीलया धृतभूधरं परिपालिताखिलगोकुलं
नीलकुंचितकुंतलं प्रणमामि दशरथिं सदा ॥ ५ ॥

मंदाराचलधारिणं दशकंधराधिविनाशनं
नंदनांगमुमापतिप्रियमिंदिरावरमच्युतम् ।
कंदजासनसेवितं सुरवृंदरावंदितविग्रहं
नंदगोपसुतं हरिं प्रणमामि दशरथिं सदा ॥ ६ ॥

कंसमुष्टिकदुष्टधेनुकपूतनादिविनाशनं
हंसकेशिनिषूदनं दमघोषसूनुविदारणम् ।
हंसमध्यलसन्महामणिकौस्तुभादिविराजितं
हिंसितासुरछेदकं प्रणमामि दशरथिं सदा ॥ ७ ॥

गोपिमंडलमध्यगं सुरवैरिमंडलदारणं
पांडवप्रियमिंद्रपूर्वसुरौघवंध्यपदांबुजम् ।
इंदिरारमणं गुणार्णवमंबुजाक्षममानुषं
नारसिंहतनुं हरिं प्रणमामि दशरथिं सदा ॥ ८ ॥

भक्तिपूर्वकमेतदष्टकमिष्टसिद्धिदमादराद्
यस्तु कीर्तयते शृणोत्यखिलापदर्णवतारकम् ।
सर्वदेववरार्चितं नृहरेः पदं परमक्षयं
याति दशरथेरनुग्रहविग्रहोऽखिलवल्लभः ॥ ९ ॥

॥ इति श्रीमन्नारायणपंडिताचार्यकृतं दाशरथ्यष्टकम् ॥

॥ भारतीरमणमुख्यप्राणांतर्गत श्री कृष्णार्पणमस्तु ॥